अनुक्रमांक (अंकों में) / Roll No. (in figures) : ______________________

अनुक्रमांक (शब्दों में) / Roll No. (in words) : ______________________

[कुल प्रश्नों की संख्या : 22] [Total No. of Questions: 22]
[कुल मुदित पृष्ठ : 04] [Total No. of Printed Pages : 04]

[समय : 3.15 घंटे] [Time: 3.15 Hours]
[पूर्णांक : 70] [Maximum Marks : 70]

# कक्षा 10वीं अर्द्ध वार्षिक परीक्षा, 2025–26
# Class 10th Half Yearly Examination, 2025-26
# संस्कृतम् / SANSKRITAM
# [ 1006 ]

*सामान्य अनुदेश :*
1) परीक्षार्थी प्रश्न–पत्र के पहले पृष्ठ पर अपना अनुक्रमांक अवश्य लिखें।
2) प्रत्येक प्रश्न के सामने उसका अंकभार अंकित है।

***General Instructions :***
1) Candidate must write his/her Roll Number on the first page of the Question Paper.
2) Marks for every question are indicated alongside.

- सर्वे प्रश्नाः अनिवार्याः।

**खण्ड – 'अ'**

प्र.1 वस्तुनिष्ठप्रश्नाः – (1×13=13)

(i) 'शुचिपर्यावरणम्' पाठानुसारेण केषां माला रमणीया?
(अ) पुष्पाणाम् (ब) ललितलतानाम् (स) रूप्यकाणाम् (द) मौक्तिकानाम्

(ii) लोके महतो भयात् कः मुच्यते?
(अ) कुशलः (ब) धूर्तः (स) बुद्धिमान् (द) बलवान्

(iii) बालभावात् हिमकरः कस्य मस्तके विराजते?
(अ) रामस्य (ब) शिवस्य (स) भरतस्य (द) कृष्णस्य

(iv) सर्वधेनूनां माता का आसीत्?
(अ) सुरभिः (ब) माया (स) रम्भा (द) चम्पा

(v) उदीरितोऽर्थः केन अपि गृह्यते?
(अ) मानवेन (ब) पशुना (स) पण्डितेन (द) अश्वेन

(vi) कः वातावरणं कर्कशध्वनिना आकुलीकरोति?
(अ) काकः (ब) मयूरः (स) पिकः (द) बकः

(vii) 'विचित्रः साक्षी' पाठः केन विरचितः?
(अ) कालिदासेन (ब) सुश्रुतेन (स) हरिदत्त शर्मणा (द) ओमप्रकाशठाकुरेण

(viii) मूर्खः कीदृशं फलं भुङ्क्ते?
(अ) मधुरम् (ब) कठोरम् (स) पक्वम् (द) अपक्वम्

(ix) दुर्वार–जलधाराभिः किम् उपस्थितम्?
(अ) महाप्लावनम् (ब) रत्नाकरम् (स) अन्नभण्डारम् (द) महासागरम्

(x) अम्भोदाः कुत्र सन्ति?
(अ) वने (ब) नगरे (स) पर्वते (द) गगने

(xi) 'अजन्तः' इत्यस्य सन्धि–विच्छेदं चिनुत –
(अ) अक् + अन्तः (ब) अच् + आन्तः (स) अच् + अन्तः (द) अज् + अनन्तः

(xii) 'गङ्गायाः समीपम्' इत्यस्य समस्तपदं वर्तते –
(अ) अधिगङ्गम् (ब) उपगङ्गम् (स) अनुगङ्गम् (द) इतिगङ्गम्

(xiii) 'सम्बोधने' विभक्तिः भवति –
(अ) षष्ठी (ब) द्वितीया (स) तृतीया (द) प्रथमा

प्र.2 निर्देशानुसारं रिक्तस्थानानि पूरयत – (1×5=5)

(i) विद्यालस्य..............बालकः अस्ति। (परितः / उपरि)
(ii) यथा वप्स्यसि..............फलं प्राप्स्यसि। (तथा / तदा)
(iii) ईश्वरः........................व्यापकः अस्ति। (तत्र / सर्वत्र)
(iv) अस्माकं देशे..............स्थानानि सन्ति। (दृश्+अनीयर्)
(v) सा बालिका......................अस्ति। (चपल+टाप्)



Scanned with OKEN Scanner

प्र.3 अधोलिखितं अपठितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –
भारते षड् ऋतवः भवन्ति–वसन्त, ग्रीष्मः, वर्षा, शरद्, हेमन्तः शिशिरः च। ग्रीष्मकालस्य पश्चात् वर्षाऋतुः आगच्छति। वर्षाकाले, ग्रीष्मस्य तापेन शुष्काः, पादपाः पुनः हरिताः। आकाशः कृष्णैः मेघैः आच्छादितः भवति। नद्यः जलवेगेन प्रवहन्ति। कुत्रचित् अत्यधिका वृष्टिः भवति। वृष्टेः अभावात् कृषकाः महत् कष्टम् अनुभवन्ति। ते वर्षादेवं प्रार्थयन्ति। वर्षाजलेन धरा शस्य श्यामला भवति। एतत् दृष्ट्वा कृषकाणां चित्तं प्रफुल्लितम् भवति।

(अ) एकपदेन उत्तरत – (2)

(i) भारते कति ऋतवः भवन्ति? (ii) नद्यः कथं प्रवहन्ति?

(ब) पूर्णवाक्येन उत्तरत – (1)

कि दृष्ट्वा कृषकाणां चित्तं प्रफुल्लितम् भवति?

(स) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (1)

(द) भाषिक कार्यम् – (i) "पादपाः" इति पदस्य किं किं विशेषणम् अत्र प्रयुक्तम्? (ii) "भवन्ति" क्रिया पदस्य कर्त्ता कः? (1+1=2)

## खण्ड – 'ब'

प्र.4 अधोलिखितानां पदानां सन्धि, सन्धि–विच्छेदं कृत्वा सन्धेः नामापि लिखत – (2)

(i) रूप्यकैः + ठनठनायते = .................... । (ii) अग्नाविह = ....................+.................... ।

प्र.5 अधोलिखितयोः वाक्ययोः रेखाङ्कित समस्तपदस्य विग्रहं, विग्रह–पदानां समासं कृत्वा समासस्य नामापि लिखत – (2)

(i) विमूढा धीः यस्य सः अपक्वं फलं भुङ्क्ते। (ii) अहं पीताम्बरं धारयामि।

प्र.6 रेखाङ्कित पदयोः विभक्तिं तत्कारणं च लिखत – (2)

(i) बालकः सिंहात् बिभेति। (ii) सीता गीतया सह पठति।

प्र.7 अधोलिखितयोः वाक्ययोः रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (1)

(i) तस्याः द्वे नामनी। (ii) धूमभस्मावृतं जायते तदा गगनम्।

प्र.8 अधोलिखितयोः वाक्ययोः यथानिर्दिष्टं वाच्यपरिवर्तनं कुरुत – (2)

(i) अहं श्लोकान् पठामि। (कर्मवाच्य) (ii) तेन जलं पीयते। (कर्तृवाच्य)

प्र.9 रेखाङ्कित–वाक्ययोः अशुद्धि–संशोधनं कृत्वा लिखत – (1)

(i) त्वम् प्रतिदिनं पठति। (ii) सः बालिका अत्र पठति।

प्र.10 अधोलिखित श्लोकस्य हिन्दीभाषायां सप्रसङ्ग भावार्थ लिखत – (2)

क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्।।

प्र.11 अधोलिखित श्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत – (2)

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

अन्वयः – आचारः (i) ..........धर्मः, इत्येतद् (ii) ..........वचः (अस्ति)। तस्मात् (iii) ..........प्राणेभ्योऽपि (iv) ..........रक्षेत्।

| सदाचारं, विशेषतः, विदुषां, प्रथमः |
|---|

प्र.12 स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। (2)

प्र.13 अधोलिखितपाठयोः कस्यचिदेकस्य पाठसारं हिन्दीभाषायां लिखत – (2)

(i) जननी तुल्यवत्सला (ii) विचित्रः साक्षी

प्र.14 'क' 'ख' च स्तम्भैः प्रदत्तै दत्तानि विलोम–पर्याय पदानि च संयोगं कुरुत – (2)

| (क) | (ख) |
|---|---|
| परुषा (विलोम) | द्रुतगत्या |
| विमूढधीः (विलोम) | वासवः |
| जवेन (पर्याय) | कोमला |
| इन्द्रः (पर्याय) | सुधीः |

प्र.15 घटिका चित्रं सहायता अंकानां स्थाने संस्कृतशब्देषु समयलेखनं कुरुत – (2)



(i) जननी 7:15....................वादने आपणं गच्छति।

(ii) विद्यार्थिनः 8:30....................वादने विद्यालयं गच्छन्ति।

## 'खण्ड – स'

प्र.16 अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

"भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।

"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यम् कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्।

(अ) एकपदेन उत्तरत – (i) कस्य दैन्यं दृष्ट्वा सुरभिः रोदिति? (ii) 'सः दीन' इति कः जानाति? (½x2=1)

(ब) पूर्णवाक्येन उत्तरत – दुर्बलः वृषभः किं वोढुं न शक्नोति? (1)



Scanned with OKEN Scanner

(स) भाषिक कार्यम् – (½x2=1)

(i) "एतत् भवान् पश्यति न?" अत्र 'भवान्' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(ii) 'सहास्राधिकेषु' इति विशेषणपदस्य विशेष्यपदं किम्?

अथवा

ज्वालामुख पर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिका – शिलादिसञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्। सेल्सियश–ताप–मात्राया अष्टशताङ्कतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति।
निहन्यते च विवशाः प्राणिनः। ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति।

(अ) एकपदेन उत्तरत – (½x2=1)

(i) ज्वालामुखपर्वतानां विस्फोटैरपि किं जायते? (ii) गगनं कीदृशं जायते?

(ब) पूर्णवाक्येन उत्तरत – (1)

ज्वालामुद्गिरन्त एते पर्वता अपि किं जनयन्ति? तथा लावारस प्रवाहेण के निहन्यते?

(स) भाषिक कार्यम् – (½x2=1)

(i) 'भूकम्पविशेषज्ञाः' इति कर्तृपदस्य गद्यांशे क्रियापदं किम्?
(ii) 'प्राणिनः' इति विशेष्यपदस्य विशेषणं किमस्ति?

प्र.17 अधोलिखितं पद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना।।

(अ) एकपदेन उत्तरत – (½x2=1)

(i) राजहंसेन कस्य शोभा भवेत्? (ii) बकाः कुत्र निवसन्ति?

(ब) पूर्णवाक्येन उत्तरत – (1)

कवि बकसहस्रं किं कथयति?

(स) भाषिक कार्यम् – (½x2=1)

(i) 'एकेन राजहंसेन' अनयोः पदयोः विशेष्यपदं चिनुत। (ii) 'शोभा' इति कर्तृपदस्य पद्यांशे क्रियापदं किम्?

अथवा

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

(अ) एकपदेन उत्तरत – (½x2=1)

(i) कः अपक्वं फलं खादति? (ii) परुषां कः अभ्युदीरयेत्?

(ब) पूर्णवाक्येन उत्तरत – (1)

बुद्धिहीनः किं त्यक्त्वा किम् अभ्युदीरयेत्?

(स) भाषिक कार्यम् – (½x2=1)

(i) 'धर्मप्रदां वाचम्' अत्र विशेष्यपदं किम्? (ii) 'भुङ्क्तेऽपक्वं विमूढधीः' अत्र कर्तृपदं किम्?

प्र.18 अधोलिखितं नाट्यांशं पठित्वा एतदा धारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

रामः – अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।
लवः – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।
रामः – अहो माहात्म्यम्।
कुशः – जानाम्यहं तस्य नामधेयम्।
रामः – कथ्यताम्।
कुशः – निरनुक्रोशो नाम..................।

(अ) एकपदेन उत्तरत – (½x2=1)

(i) जनकं नामतो वेदितुमिच्छामि इति कः वदति? (ii) लवः कस्य नामधेयं न जानाति?

(ब) पूर्णवाक्येन उत्तरत – (1)

तपोवने कश्चिदपि कस्य नाम न व्यवहरति?

(स) भाषिक कार्यम् – (½x2=1)

(i) "भवतोः जनकं नामतो वेदितुमिच्छामि।" वाक्येऽस्मिन् क्रियापदं किम्?
(ii) "अस्मिन् तपोवने तस्य नाम व्यवहरति।" इत्यत्र विशेषणं पदं किम्?

अथवा

निद्राभङ्गदुःखेन वनराजः सन्नति तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति –

सिंहः – (क्रोधेन गर्जन्) भोः! अहं वनराजः, किं भयं न जायते? किमर्थं मामेव तुदन्ति सर्वे मिलित्वा?
एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि, तर्हि कथमस्मान् रक्षिष्यसि?



Scanned with OKEN Scanner

(अ) एकपदेन उत्तरत – (½X2=1)

(i) श्रान्तः सिंहः कान् दृष्ट्वा पृच्छति? (ii) कः वनराजः भवितुं सर्वथाऽयोग्यः?

(ब) पूर्णवाक्येन उत्तरत – (1)

सिंहः कुत्र समर्थः नास्ति?

(स) भाषिक कार्यम् – (½X2=1)

(i) "अस्मान् रक्षिष्यसि" इत्यत्र क्रियापदं किम्? (ii) 'रक्षकः' इति पदस्य नाट्यांशे विलोमपदं किम्?

प्र.19 अधोलिखितानि वाक्यानि क्रम–रहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत – (3)

(i) तस्य शाखायां वानरः वसति स्म। (ii) नद्याः तटे फलोपेतः आम्रवृक्षः आसीत्।

(iii) "फलानि अतिमधुराणि" अतः वानरः हृदयं खादामि। (iv) मकरः वानरेण पातितानि मधुरफलानि आस्वाद्य अचिन्तयत्।

(v) वानरः मकरस्य प्रयासं बुद्धि चातुर्येण विफली कृतवान्। (vi) एकदा एकः मकरः नद्यां वसति स्म।

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया "स्वच्छतायाः महत्त्वम्" इति विषये षट्–संस्कृत वाक्येषु एकम् अनुच्छेदं लिखत।

| समाजे, सर्वत्र, प्रसन्नता, कर्त्तव्यम्, मनसि, जीवने |
|---|

'खण्ड – द'

प्र.20 भवान् राजकीय–उच्च–माध्यमिक–विद्यालयः जयपुरस्य दशम्याः कक्षायाः छात्रः सुरेशः अस्ति। स्वकीयं प्रधानाचार्यं प्रति दिनद्वयस्य अवकाशार्थम् एकं प्रार्थना–पत्रं लिखतु। (4)

अथवा

भवान् मुकेशः। मातरं प्रति अधोलिखितं पत्रं मञ्जूषापद सहायतया लिखत। (4)

| गुरुयातिथिः, अध्ययनम्, अभिनयम्, वार्षिकोत्सवः, पितरम्, कुशलम्, सर्वेभ्यः, भवदीयः |
|---|

पूजनीयाः मातृचरणाः। जयपुरम्।

नमोनमः। अत्र (i)..................तत्रास्तु। मम विद्यालये (ii)..............आसीत्। तत्र अहम् एकम् (iii)..................कृतवान्। मन्त्रिमहोदयः (iv)..................रूपेण आगतवान्। मम (v)..............सम्यक् चलति। गृहे (vi)..............नमोनमः। अहं (vii).................... प्रणमामि।

(viii)..............................

मुकेशः

प्र.21 अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्ट वाक्यानि निर्माय लिखत – (4)

| खगाः, विकसन्ति, कमलानि, उदेति, क्रीडन्ति, सूर्यः, डयन्ते चित्रपतङ्गाः कूजन्ति, बालाः |
|---|



अथवा

मञ्जूषायाः उपयुक्तपदानि गृहीत्वा अध्ययनविषये द्वयोः मित्रयोः संवादं पूरयत –

| तत्र, त्वं, मया, अपश्य, कदा, अतिरमणीयः, गतमासे, अगच्छम् |
|---|

महेशः – नरेशः! ग्रीष्मावकाशे (i) ..............................कुत्र अगच्छः।

नरेशः – महेशः! अहं ग्रीष्मावकाशे गोवा (ii) ..............................।

महेशः – अहो! (iii) ..............................सः प्रदेशः।

नरेशः – आम् (iv) ..............................गोवातटम् अपश्यम्।

महेशः – किं त्वं गोपामन्दिरं न (v) ..............................?

नरेशः – (vi) ..............................सह मम जननी जनकः च आस्ताम्।

महेशः – यूयं (vii) ..............................ततः आगच्छत?

नरेशः – वयं (viii) ..............................एव आगच्छाम।

प्र.22 अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषाया अनुवादं कुरुत – (4)

(i) हम दोनों चित्र देखते हैं। (ii) सिंह वन में रहता हैं। (iii) वह क्या पूछता है?

(iv) गंगा हिमालय से निकलती हैं। (v) वह माता के साथ जाती है। (vi) उसने पुस्तक पढी।

-----------------------------------------------------



Scanned with OKEN Scanner